प्राकृतदोषः, पुं, (प्राकृतो दोषः ।) वर्षाशरद्-वसन्तेषु क्रमेण कुपितो वातः पित्तं कफश्च । यथा, रचितः ।
"चयप्रकोपप्रशमाः पित्तस्य प्रावृडादिषु ।
श्लेष्मणः शिशिराद्येषु वायोर्घर्म्मादिषु त्रिषु ॥"

प्राकृतप्रलयः, पुं, (प्राकृतः प्रकृतिसम्बन्धी प्रलयः) प्रकृतेर्लयः । तस्य विवरणम् । यथा,—
"निर्गुणस्य च नित्यस्य चाद्यन्तरहितस्य च ।
निमेषाणां सहस्रे च प्रकृतेर्द्दण्ड उच्यते ॥
षष्टिदण्डात्मकस्तस्य वासरश्च प्रकीर्त्तितः ।
मासस्त्रिंशद्दिवारात्रैर्वर्षं द्वादशमासकैः ॥
एवं शते शताब्दे च श्रीकृष्णे प्रकृतेर्लयः ।
प्रकृत्याश्च प्रलीनायां तदेवं प्राकृतो लयः ॥
सर्व्वाः संहृत्य सा चैका महाविष्णोः प्रसूश्च या
कृष्णवक्षसि लीना च मूलप्रकृतिरीश्वरी ॥
शाक्ता वदन्ति तां दुर्गां विष्णुमायां सनातनीम्
सर्व्वशक्तिस्वरूपाञ्च परां नारायणीं सतीम् ॥
बुद्ध्यधिष्ठातृदेवीञ्च कृष्णस्य त्रिगुणात्मिकाम् ।
यन्मायया मोहिताश्च ब्रह्मविष्णुशिवादयः ॥
वैष्णवास्तां महालक्ष्मीं परां राधां वदन्ति ते ।
यदर्द्धाङ्गा महालक्ष्मीः प्रिया नारायणस्य च ॥
प्राणाधिष्ठातृदेवीञ्च प्रेम्णा प्राणाधिकां वराम्
शश्वत् प्रेममयीं शक्तिं निर्गुणां निर्गुणस्य च ॥
नारायणश्च भगवान् संहृत्य स्वगणान् बहून् ।
शुद्धसत्त्वस्वरूपी च कृष्णे लीनश्च निर्गुणे ॥
गोपा गोप्यश्च गावश्च सुरभ्यश्च नराधिप ! ।
सर्व्वे लीनाः प्रकृत्याञ्च प्रकृतिः प्रकृतीश्वरे ॥
महाविष्णौ विलीनाश्च सर्व्वे ते क्षुद्रविष्णवः ।
महाविष्णुः प्रकृत्याञ्च सा चैव परमात्मनि ॥
प्रकृतिर्योगनिद्रा च श्रीकृष्णनेत्रपद्मयोः ।
अधिष्ठानं चकारैवं मायया चेश्वरेच्छया ॥
प्रकृतेर्व्वासरं यावन्मितं कालं प्रकीर्त्तितम् ।
तावद्वृन्दावने निद्रा कृष्णस्य परमात्मनः ॥
अमूल्यरत्नतल्पे च वह्निशुद्धांशुकान्विते ।
गन्धचन्दनमाल्याढ्ये वायुना सुरभीकृते ॥
पुनः प्रजागरे तस्य सर्व्वसृष्टिर्भवेत् पुनः ।
एवं सर्व्वे प्राकृतिकाः श्रीकृष्णं निर्गुणं विना॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५१ अध्यायः ॥*॥
अपि च ।
"प्रकृतौ संस्थितो यस्मात् सर्व्वस्त्वावसञ्चयः ।
अहङ्कारमहत्तत्त्वगतो यत् प्राकृतो लयः ॥
प्रकृतौ संस्थितो व्यक्तमतीतप्रलयस्तु यत् ।
तस्मात् प्राकृतसंज्ञोऽयमुच्यते प्रतिसञ्चरः ॥
अयं वः कथितो विप्राः प्राकृताख्यो महालयः॥"
इति कालिकापुराणे २४ अध्यायः ॥

प्राकृतमानुषः पुं, (प्राकृतः सामान्यो मानुषः) सामान्यमनुष्यः । यथा महाभारते गदापर्व्वणि ।
"एकादशचमूनाथं भीम ! पादेन मा स्पृश ।
पञ्चानामपि यो भर्त्ता नासौ प्राकृतमानुषः ॥"

प्राकृतमित्रं, क्ली, (प्राकृतं स्वाभाविकं मित्रं सुहृत् ।) स्वदेशव्यवहितदेशावस्थितराजादिः । यथा, माघे । २ । ३६ ।
"सखा गरीयान् शत्रुश्च कृत्रिमस्तौ हि कार्य्यतः
स्यातामममित्रौ मित्रे च सहजप्राकृतावपि ॥"
अस्य टीका । "ननु सुहृद्रोऽयं चैद्यः किं नः करिष्यतीत्याशङ्क्य तस्य बलवत्तां वक्तुं मित्रामित्रबलाबलविवेकं तावत् करोति । सखेति । क्रियया उपकारापकारान्यतररूपया निर्वृत्तः कृत्रिमः सखा सुहृत् गरीयान् बलवान् एवं शत्रुश्च कृत्रिमो गरीयान् कुतः हि यस्मात्तौ कृत्रिममित्रशत्रू च कार्य्यतः उपकारापकाररूपकार्य्यवशात् निर्वृत्तावितिशेषः । उक्तकार्यो पाधेयावज्जीवमनपायादनयोर्म्मित्रामित्रभावोऽपि अनपायीति गरीयस्त्वमिति भावः । सहजप्राकृतौ तु नैवमित्याह स्यातामिति । सहजातः सहजः एकशरीरावयवत्वात् तत्र सहजं मित्रं मातृष्वसेयपितृष्वसेयादि, सहजशत्रुस्तु पितृव्यतत्पुत्त्रादिः प्रकृत्या सिद्धः प्राकृतः पूर्व्वोक्तसहजकृत्रिमलक्षणरहित इत्यर्थः । तत्र विषयान्तरः प्राकृतः शत्रुः तदनन्तरः प्राकृतं मित्रं अपि त्वर्थे तौ सहजप्राकृतौ शत्रुमित्रे च स्यातां न त्वात्मकार्य्यवशादनियमेनोभयरूपतामापद्येते न कृत्रिमशत्रुमित्रे कृत्रिमशत्रुः शत्रुरेव मित्रञ्च मित्रमेवेति कृत्रिमावेव मित्रामित्रौ गरीयांसौ न तु सहजौ नापि प्राकृतावित्यर्थः । अनेन कृत्रिमत्वं सर्व्वापवादीति सिद्धम् ।" इति मल्लिनाथः ॥

प्राकृतशत्रुः, पुं, (प्राकृतः स्वाभाविकः शत्रुः ।) स्वदेशाव्यवहितदेशावस्थितराजादिः । यथा । "विषयान्तरः प्राकृतः शत्रुः ।" इति माघटीकायां मल्लिनाथः ॥

प्राकृतिकः, त्रि, (प्रकृति + ठञ् ।) प्रकृतिविकारः । प्रकृतिसम्बन्धी । यथा,—
"एवं सर्व्वे प्राकृतिकाः श्रीकृष्णं निर्गुणं विना॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५१ अध्यायः ॥
(प्रलयविशेषे,पुं । यथा विष्णुपुराणे १।७।३८।
"नैमित्तिकः प्राकृतिकस्तथैवात्यन्तिको द्विज ।
नित्यश्च सर्व्वभूतानां प्रलयोऽयं चतुर्विधः ॥")

प्राक्तनः, त्रि, (प्राक् प्राचि काले देशे प्राच्यां दिशि वा भवः । प्राक् + कालवाचिनोऽव्ययात् ट्युल् ।)प्राग्भवः । यथा ।"प्रपेदिरे प्राक्तनजन्मविद्याः ॥" इति कुमारसम्भवम् ॥
अन्यच्च ।
"प्राक्तनेन शुभं सर्व्वं सुखञ्च विभवश्चिरम् ।
दुःखं शोकः प्राक्तनेन विपत् सम्पच्च साम्प्रतम्॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १४अध्यायः॥
अपि च तत्रैव १२८ अध्याये ।
"विधाता लिखितं कर्म्म प्राक्तनं केन वार्य्यते ।
मा भुक्तं क्षीयते कर्म्म कल्पकोटिशतैरपि ॥"

प्राक्तनकर्म्म, क्ली,(प्राक्तनं पुराभवं कर्म्म अत्रास्य तज्जनकत्वादपि तज्जन्यत्वारोपः ।) भाग्यम् । अदृष्टम् । इति जटाधरः ॥ पुराकृतकार्य्यञ्च ॥

प्राक्फलः,पुं, (प्राक् फलं यस्य ।) पनसः । इति जटाधरः ॥

प्राक्फल्गुनी, स्त्री, (प्राची फल्गुनी ।) पूर्व्वफल्गुनी । यथा । प्राक्फल्गुन्यर्थे जन्मकाले च यस्य । इति कोष्ठीप्रदीपः ॥

प्राक्फल्गुनीभवः,पुं, (प्राक्फल्गुन्यां भव उत्पत्तिर्यस्य ।)बृहस्पतिः । इति हारावली ।३६॥ पूर्व्वफल्गुन्यां जाते, त्रि ॥

प्राक्फाल्गुनः, पुं, (प्राक्फल्गुन्यां भव इति । प्राक्फल्गुण + अण् ।)बृहस्पतिः । इति शब्दरत्नावली ॥

प्राक्फाल्गुनेयः,पुं, (प्राक्फल्गुन्यां भव इति । प्राक्फल्गुन + ढञ् ।) बृहस्पतिः । इति त्रिकाण्डशेषः ॥

प्राखर्य्यं,(प्रखरस्य भावः । प्रखर + ष्यञ ।)प्रखरत्वम् । तीक्ष्णता । प्रखरशब्दात् भावार्थे ष्यप्रत्ययः ॥

प्रागभावः, पुं, (प्राग्वर्त्ती अभावः ।) संसर्गाभावविशेषः ॥ (यथा, भाषापरिच्छेदे ।१२-१३
"अभावस्तु द्विधा संसर्गान्योन्याभावभेदतः ।
प्रागभावस्तथाध्वंसोऽप्यत्यन्ताभाव एव च ॥
एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते ॥")
तस्य लक्षणम् । विनाश्यभावत्वम् । इति सिद्धान्तमुक्तावली ॥

प्रागल्भ्यं, क्ली, प्रगल्भस्य भावः । प्रगल्भ + ष्यञ् ।) प्रगल्भता । यथा,—
प्रागल्भ्यहीनस्य नरस्य विद्या
शस्त्रं यथा कापुरुषस्य हस्ते ।
न तुष्टिमुत्पादयते शरीरे
हृद्धस्य दारा इव दर्शनीयाः ॥"
इति ज्योतिस्तत्त्वम् ॥
स्त्रीणामयत्नजभावविशेषः । यथा,—
"प्रागल्भ्यौदार्य्यमाधुर्य्यशोभाधीरत्वकान्तयः ।
दीप्तिश्चायत्नजा भावहावहेलास्त्रयोऽङ्गजाः ॥"
इति हेमचन्द्रः ।४।१७३॥
(यथा च साहित्यदर्पणे । ३ । १०२ ।
"निःसाध्वसत्वं प्रागल्भ्यम् ॥" यथा,—
"समाश्लिष्टाः समाश्लेषैश्चुम्बिताश्चुम्बनैरपि ।
दष्टाश्च दशनैः कान्तं दासीकुर्व्वन्ति योषितः ॥"

प्रागुदीची,स्त्री,(प्राची उदीची च दिगिति कर्म्मधारयः । पूर्व्वोत्तरदिक् । ईशानकोणः । यथा तन्त्रोत्कीर्णमृत्तिकाः प्रागुदीच्यां दिशि क्षिपेत्" इति भवदेवभट्टः ॥

प्राग्ज्योतिषः,पुं, (प्राक् ज्योतिषं नक्षत्रं यत्र । तदुक्तं कालिकापुराणे ।
"अत्रैव हि स्थितो ब्रह्मा प्राङ्नक्षत्रं ससर्ज ह ।
"ततः प्राग्ज्योतिषाख्येयं पुरी शक्रपुरीसमा॥"
कामरूपदेशः । इति हेमचन्द्रः । ४ । २२ ॥
स तु नरकराजपुरम् । यथा,—
श्रीभगवानुवाच ।
"करतोया सत्यगङ्गा पूर्व्वभागावधिश्रिता ।
यावल्ललितकान्तास्ति तावद्देशं पुरं तदा ॥
तत्र देवी महामाया योगनिद्रा जगत्प्रसूः ।
कामाख्यारूपमादाय सदा तिष्ठति शोभना ॥